॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

## ૧૪. ચતુર્દશઃ સર્ગઃ

પરિવૃઢઘનસંઘે રાજસિંહોર્જશક્ત્યા
ત્યજતિ મલિનભાવં નીરસત્વાન્નિકામમ ।
સ્ફુટમુદયતિ તેજસ્વ્યુજ્જ્વલે મધ્વભાનૌ
સુજનજલજકાંત્યૈ વિશ્વમાસીન્મનોજ્ઞમ ॥ ૧૪.૧ ॥

કૃતમપકૃતમાર્યૈઃ ક્ષમ્યતાં ક્ષાંતિભૂષૈઃ
ઈતિ મૃદુ વદતાં ચ પ્રાર્થનાભિઃ પ્રભૂણામ ।
અપહૃતમપરેષાં મંત્રતો ગ્રંથજાતં
દશહૃદયનિયોગાદગ્રહીચ્છંકરાર્યઃ ॥ ૧૪.૨ ॥

પરિવૃતમવનમ્રૈર્ગ્રામણીગ્રામ્યપૂર્વૈઃ
અવનતમુરુચેતઃપાદપાર્શ્વે નૃસિંહમ ।
સહજવિજયતોઽચ્યુગ્વિક્રમાર્યઃ પ્રસન્નઃ
કવિકુલતિલકોઽસાવાશિષાઽતોષયત્તમ ॥ ૧૪.૩ ॥

ઉપચરતિ નિતાંતં હંત પૌરંદરી ધૂઃ
દ્યુસદસિ ભજતો યં દુર્લભા દભ્રભાગ્યૈઃ ।

દિશતુ સ પરમાગ્ર્યાનંદતીર્થાંઘ્રિરેણુઃ
ધરણિધર સુખં તે સંતતં સ્વાંતરેતિ ॥ ૧૪.૪ ॥

અનતિપરિચિતસ્યાપ્યસ્ય સોઽયં કવીંદ્રો
ગુણરસમતિગૂઢં જ્ઞાતવાનિત્યચિત્રમ ।
મધુ મધુકરરાજો નિષ્પતન પૌષ્પમાપ્તું
નનુ પરિચયહીનઃ કાનનેઽપિ પ્રભુઃ સ્યાત ॥ ૧૪.૫ ॥

અખિલખલકુલાનાં વર્ધયન દ્વેષદોષં
વિદધદપિ નરાણાં કૌતુકં મધ્યમાનામ ।
સ્વગતિસમુચિતાનાં ભૂતિદાયી શુભાનાં
બહળહૃદિહ નિન્યે શર્વરીઃ કાશ્ચિદેવમ ॥ ૧૪.૬ ॥

ઉદયતિ વિનતાયા નંદને શ્લાઘ્યકાલે
સ કૃતસકલકૃત્યઃ કૃત્યવેદિપ્રવેકઃ ।
અરુણયવનિકાંતર્બ્રહ્મ નારાયણાખ્યં
ગુરુગુણમભિદધ્યૌ યોગ્યયોગાસનસ્થઃ ॥ ૧૪.૭ ॥

અતિધવળિતદંતા દંતકાષ્ઠૈઃ પ્રશસ્તૈઃ
અપિ યુગપદનેકે સસ્નુરત્ર વ્રતીંદ્રાઃ ।
ગુરુભિરભિહિતેષ્વાચારભેદેષુ નિષ્ઠાં
સ્ફુટમવગમયંતઃ સૌષ્ઠવાત કર્મણાં ચ ॥ ૧૪.૮ ॥
ચરમસમયસુપ્તાઃ પૂર્વમુત્થાય શિષ્યાઃ

ગુરુજનપરિચર્યાં ચક્રિરે દુષ્કરાં ચ ।
સબહુમતિ તદાધ્યપ્યાઽર્ધરાત્રાત પ્રસન્નાઃ
સુગતિરપરથૈષાં સ્યાત કથંકારમિષ્ટા ॥ ૧૪.૯ ॥

શ્રવણમનનહેતોઃ પ્રાક ચિરાચાસ્તનિદ્રઃ
સપદિ વિવશયંત્યા નિદ્રયા ગ્રસ્તચેતાઃ ।
સ્વયમપિ નયતિ દ્રાગંગવસ્ત્રાદિ પૂજ્યે
ઝટિતિ વિગતનિદ્રઃ કોઽપિ શિષ્યોઽન્વશેત ॥ ૧૪.૧૦ ॥

વિહિતમવિહિતં પ્રાગેવ કસ્માદ વિનિદ્રૈઃ
ઈતિ ગુરુપરિવાદાશંકયા નમ્રગાત્રાઃ ।
ચિરમનવતરંતઃ શ્રાવકા મુકતમાર્ગાઃ
ગુરુષુ જલસકાશસ્થેષુ તૂષ્ણીમતિષ્ઠન ॥ ૧૪.૧૧ ॥

વિપુલહૃદયપાર્શ્વે દીપદીપ્તિપ્રદીપ્તે
દરવરપરિપૂર્ણૈર્વાર્ભિરર્ઘ્યાદિ દત્વા ।
યતિરતિયતચેતાશ્ચક્રિણોઽર્ચાનિકાયાત
કુસુમસમિતિમગ્ર્યામાદરાદુજ્જહાર ॥ ૧૪.૧૨ ॥

અમૃતમપિ નિરીક્ષ્યાઽસ્રાવિ નિર્માલ્યસૂને
ઘૃતમિદમિતિ સદ્યો ભ્રાંતિમંતોઽપિ શિષ્યાઃ ।
શ્રદધુરધિકવાક્યૈર્વિભ્રમાસ્તચ્ચ પશ્ચાદ
અનુદિનમમૃતાન્નૈસ્તસ્ય સેવ્યસ્ય શકત્યા ॥ ૧૪.૧૩ ॥

અગમદુચિતમંત્રૈસ્તૂદયાનાં ત્રયાણાં
કૃતિભિરનુમતાત્મા તત્ર પંચાંગવિદ્ભિઃ ।
ઉદયમહિમરોચિશ્ચક્રવર્તી ત્રિશક્તિઃ
દધદતિબૃહદંતઃ ષડ્ગુણં સ્વાત્મતેજઃ ॥ ૧૪.૧૪ ॥

તિમિરનિકરકુંભિવ્રાતમત્યંતતીવ્રં
સ્થિરતરમખિલાનાં પ્રાણિનાં રુદ્ધમાર્ગમ ।
ભુવનભવનપૂર્ણં ભાનુમાનંજનાભં
હરિરિવ નખરૈઃ પ્રાગ રશ્મિજાલૈર્નિરાસ ॥ ૧૪.૧૫ ॥

મધુરપતગરાવાઃ શાંતનૈશાંબુબાષ્પાઃ
સપદિ વિપુલરાગઃ સ્વાભિસારાત પ્રસન્નાઃ ।
અરુણતરણિરત્યચ્છાંબરા દિકપુરંધ્રીઃ
સ્મિતસરસિજવક્ત્રાઃ સ્વૈઃ કરૈરાલિલિંગે ॥ ૧૪.૧૬ ॥

પ્રણતિરભસધૂળીબદ્ધશોભાવિશેષા
દધુરુપકૃતિમત્તાં સાધુજાલાંતરાપ્તાઃ ।
સમયમુપનતં સંવેદયંતો વયસ્યા
ઈવ દશશતકેતોઃ કેતવઃ શ્રાવકાણામ ॥ ૧૪.૧૭ ॥

નિહિતમુચિતમુચ્ચં યોગપીઠં પ્રવક્તુઃ
પરિષદિ પરિતોઽમી સત્વરાઃ સત્ત્વભાજઃ ॥

www.yousigma.com

દ્રુતમવસિતકૃત્યૈર્ધન્યસંન્યાસિવર્ગૈઃ
શ્રવણપરમકૃત્યાયોપતસ્થુઃ સમેતાઃ ॥ ૧૪.૧૮ ॥

બભુરમલગુણાનાં શોભનાચ્છાદનાનાં
મુરરિપુનિલયાનાં હંત વૈદાંતિકીનામ ।
સપદિ સુવિવૃતાનામંતરર્થા ધિયાં વા
વિવિધકવળિકાનાં સંચયાઃ પત્રિકાણામ ॥ ૧૪.૧૯ ॥

અનતિવિરળભાવા અપ્યનન્યોન્યસંગાઃ
ઋજુતરતતનાનાપંક્તિસામ્યાપ્તશોભાઃ ।
દ્વિરદતુરગદેશ્યા દૂરતો વર્જિતાંતાઃ
કુશલલિખિતરૂપા રેજિરે તેષુ વર્ણાઃ ॥ ૧૪.૨૦ ॥

સપદિ દદૃશુરેકે વાચનીયાદિભાગં
પરિચયપટુતાભ્યાં તાવદેકે ચિરેણ ।
હરિગુરુનમનં દ્રાગ યત્નતોઽમી વિધાય
પ્રચુરપરસામ્યં સિદ્ધયે સ્યાદ્ધિ યત્નઃ ॥ ૧૪.૨૧ ॥

યતવચસિ જનેઽસ્મિન્નાનતે સન્નિરસ્યન
સિચયયવનિકાં તાં સાંધ્યજીમૂતરકતામ ।
રવિરિવ રવિપૂજ્યાંઘ્રિઃ સમાજાંતરિક્ષે
વ્યલસદતિ શયાલુઃ સન સહસ્રપ્રકાશઃ ॥ ૧૪.૨૨ ॥

ત્રિભુવનવરતેજોવ્યક્તવેદાર્થશુકલ
ત્રિતયરસતયા યે વર્ણિતા વર્ણવર્યાઃ ।
પૃથુમતિરથ તેષામૈક્યમાપાદ્ય સમ્યક
પ્રવચનપરિશુદ્ધ્યૈ સ્મ પ્રણૌતિ પ્રવીણઃ ॥ ૧૪.૨૩ ॥

સ્વરમચરમકાલે મંદ્રમેવાત્યજદ્ભિઃ
સ્ફુટમુપનિષદંતે વાચકૈર્વાચ્યમાને ।
પ્રવચનમતિચિત્રં પ્રાણભાજાં શ્રુતીનાં
અમૃતમમૃતભાવસ્યૈષ હેતું ચકાર ॥ ૧૪.૨૪ ॥

ધનમિવ સધનાયેભ્યોઽર્કસૂનુઃ પ્રસન્નઃ
શરશતમિવ પાર્થઃ સંયુગાર્થિભ્ય ઉગ્રઃ ।
અરતિવિરહિતઃ સોઽનારતં નાઽદિશન્નો
પ્રતિવચનમદીનં ચોદકેભ્યોઽખિલેભ્યઃ ॥ ૧૪.૨૫ ॥

અથ દશશતશોચિષ્યાપ્રયાતિ પ્રતીચ્યાં
પ્રવચનમવસાય સ્નાતુમાયાત તટાકમ ।
પૃથુમતિરિહ તાવચ્છ્રેષ્ઠસંસર્ગલોલૈઃ
સમગમિ સપદિ સ્વર્નિમ્નગાદ્યૈશ્ચ તીર્થૈઃ ॥ ૧૪.૨૬ ॥

ઘનરસનિકરોઽસાવંતરત્યંતશુદ્ધો
મુનિગણ ઈવ ભૂયઃ સ્નેહવાન પ્રાગ દધાનઃ ।
પ્રતિકૃતિમખિલજ્ઞસ્યાઽપરોક્ષ્યેણ તાવત

સ્ફુટમલભત રૂપં મજ્જને સજ્જનેષ્ટમ ॥ ૧૪.૨૭ ॥

અપરિમિતમનીષસ્ચોલ્લસચ્છંખબાહોઃ
રથચરણિશિલાનાં તન્વતોઽત્રાભિષેકમ ।
પ્રતિતનવ ઉદારાસ્તાસ્વલં સન્નિધાતુઃ
તનવ ઈવ વિરેજુઃ પાંચજન્યપ્રિયસ્ય ॥ ૧૪.૨૮ ॥

અભિદધતિ મુનીંદ્રા દ્વાદશાબ્દોપવાસ
પ્રતિમફલમલંચત્સેવનં ભક્તિયુકતમ ।
અધિકમમરનદ્યાદ્યાપ્લવાદ્વન્યમાન્યાદ
અપિબદલવબોધો વિષ્ણુપાદોદકં તત ॥ ૧૪.૨૯ ॥

તરણિભિરિવ ગૌરૈરૂર્ધ્વપુંડ્રૈર્દ્વિષડ્ભિઃ
સદરપરમચક્રોદીર્ણતેજા હરીષ્ટઃ ।
મુરરિપુવિમુખાનાં દુસ્સહો દેહભાજાં
લયસમય ઈવાન્યો માન્યધીરાબભાસે ॥ ૧૪.૩૦ ॥

સમધિકધિષણસ્ય પ્રેક્ષમાણો જનૌઘઃ
પ્રકૃતિમધુરમાસ્યવ્યાજપૂર્ણેંદુબિંબમ ।
અમુચદપસરેતિ શ્રાવકોકતેઃ પુરાઽસ્મિન
પ્રચલતિ પદવીં તાં પ્રાંજલિસ્તૂર્ણમારાત ॥ ૧૪.૩૧ ॥

ગુરુચરણસરોજદ્વંદ્વનિર્ણેજનાંભો

દધતિ જનનિકાયે સર્વમુર્વીગતં ચ ।
અવનિરનભિનંદિન્યપ્યદશ્ચક્ષમેઽસૌ
કથમપિ કથમેવ સ્યાત ક્ષમાખ્યાઽન્યથાઽસ્યાઃ ॥ ૧૪.૩૨ ॥

અવિદિતરસભેદં શીતળં લઘ્વગંધં
વિમલમમલપાણિઃ પાણિજૈરપ્રવિષ્ટમ ।
વદનપવનભીત્યા પાર્શ્વતો બિભ્રદગ્ર્યં
કમથ કરકપૂર્ણ સંચમીહાનિનાય ॥ ૧૪.૩૩ ॥

વિહસિતબિસભંગશ્રીપ્રકર્ષ સિતિમ્ના
જલજમમૃતપૂરૈઃ પૂરયામાસ રમ્યમ ।
સમચગુણવિશેષાલોચકૈર્લાળનીચઃ
સસુરભિસુમનોભિઃ સ સ્ફુટં ગૌરપકશ અઃ ॥ ૧૪.૩૪ ॥

વિમલમલયજાંભોબિંદુભિશ્ચર્ચિતાર્ચો
નવલલિતતુળસ્યા પુષ્પરાજ્યાઽર્ચિચત સઃ
સ્થલજજલજવલ્લીવૃક્ષવીરુત્સમસ્ત
પ્રસવવિજયલક્ષ્મ્યા મૂર્તયેવેંદિરેશમ ॥ ૧૪.૩૫ ॥

સ દદદધિકબોધઃ ષોડશાત્રોપચારાન
વ્યરહયદગુણાન દ્વાત્રિંશદાગઃ પુરોગાન ।
અગણિતગુણમુચ્ચૈસ્તોષયન શાર્ઙ્ગપાણિં
ષડપિ પરમભકત્યાઽનૂપચારાન દિદેશ ॥ ૧૪.૩૬ ॥

તમરુણમણિવર્ણં દિવ્યદેહાખ્યગેહે
સ્નપિતમતિપૃથુશ્રદ્ધાનદીચિત્તવાર્ભિઃ ।
નનુ સ યજતિ નિત્યં હૃત્સરોજાસનસ્થં
ન તુ સકૃદિતિ પુષ્પૈરષ્ટભિર્ભાવપુષ્પૈઃ ॥ ૧૪.૩૭ ॥

કૃતપરમસપર્યઃ સાંદ્રસચ્ચંદનાંભઃ
પરિમળિતભુજોરોમંડલાંસો મનીષી ।
સ્મિતરુચિરમુખેંદુઃ સ્નિગ્ધકૌશેયવાસાઃ
સ મુનિસુરનરાણાં ચક્ષુષામુત્સવોઽભૂત ॥ ૧૪.૩૮ ॥

પરમથ પરમાન્નં પ્રાપ્તમેવાપ્રયાસં
પ્રભુરિહ બુભુજેઽસૌ વેદવાદપ્રવીણઃ ।
અજિતપરમભક્તઃ સંતતં મન્યમાનઃ
સકલજગદધીશઃ પ્રીયતાં શૌરિરિત્થમ ॥ ૧૪.૩૯ ॥

સહચરપરિકલપ્તે સૂક્ષ્મવસ્ત્રાસ્તૃતેઽસૌ
અવિતનુરુહરૂપૌશીરવર્યે નિષણ્ણઃ ।
અરમયદિહ નાનાહૃદ્યવિદ્યાવિલાસૈઃ
કવિજનપરિવારં મંડયન મંડપાગ્ર્યમ ॥ ૧૪.૪૦ ॥

અવસરમધિગમ્ય ભ્રૂવિજૃંભાદભીષ્ટો
મુખસતતગલક્ષ્મીભૂતપાણિપ્રવાળઃ ।

સ્મિતનયનવિકાસૈસ્તસ્ય વિજ્ઞાતભાવઃ
શ્રવસિ કિમપિ કાર્યં મંત્રયામાસ મંક્ષુ ॥ ૧૪.૪૧ ॥

પ્રણતિપરમકૃત્યાઃ સન્મતેર્યે જનૌઘાઃ
વિબભુરનતિદૂરે સંહતાસ્તાનતીત્ય ।
અહમહમિકયાઽઽશુ પ્રાપ્ય પાર્શ્વં પ્રણેમુઃ
બહવ ઈહ ગૃહસ્થાઃ પૂર્વસેવાં વિધાતુમ ॥ ૧૪.૪૨ ॥

વિવિધજનપદસ્થાઃ પ્રાક શ્રુતેભ્યો ગુણેભ્યઃ
શતગુણગુણમેનં વિસ્મિતા વીક્ષમાણાઃ ।
મુકુળિતકરપદ્મા આસ્યતામિત્યવાપ્તાઃ
પ્રચુરતરહૃદા સંભાવયાંચક્રિરેઽન્યે ॥ ૧૪.૪૩ ॥

અલમલમનુવાદેનાનુવાચ્યેત પશ્ચાત
નનુ ગુરવ ઈદાનીમુધતા હિ પ્રવક્તુમ ।
ન મનનમધુના દ્રાગાવ્રજેત્યાહ્વયત તાન
શ્રુતપરિચયસક્તાન શ્રાવકાન શ્રાવકાગ્ર્યઃ ॥ ૧૪.૪૪ ॥

અધિકધિષણમેનં વ્યાખ્યયા શોભમાનં
હરિમિવ કવિવર્યં સત્યવત્યાસ્તનૂજમ ।
સતતમનિમિષં સંદૃશ્ય સાનંદચિત્તાઃ
સમયમપિ ગતં સંવિદ્રતે ન સ્મ લોકાઃ ॥ ૧૪.૪૫ ॥

www.yousigma.com

ઉદયમિત ઈવાસ્તં ચંદ્ર ભાનુર્બભાસે
સ્ફુટમકલુશરૂપો દર્શનીચોઽનુરાગી ।
શુચિ હરિપદમાપત્સંપદોરાશ્રિતાનાં
ન હિ ભવતિ વિશેષઃ સ્વપ્રકાશોન્નતાનામ ॥ ૧૪.૪૬ ॥

મરતકમણિવર્ણે ભૂતધાત્રી પુરંધ્યાઃ
લસતિ જલધિવાસસ્ચર્ધલીનઃ ક્ષણાર્ધમ ।
અરુણતરણિબિંબચ્છન્ના પદ્મરાગઃ
કપિશકરકલાપોલ્લાસ્ચભૂત પ્રેક્ષણીચઃ ॥ ૧૪.૪૭ ॥

અવનિવનવનધ્રુગ્વાચુખાહમ્મહત્સુ
પ્રકૃતિગુણસમેતાવ્યાકૃતાકાશ એકમ ।
તતમતનુમનાઃ સોઽચિંતચત સત્સમાધૌ
અસુરસુરનરેભ્ચઃ સદ્ગુણં નાથમન્ચમ ॥ ૧૪.૪૮ ॥

વ્યદધત પરિદૃષ્ટજ્યોતિષઃ સાધુ સાંધ્યં
નિચમમવનિદેવા જ્યોતિષોઽપ્યાવલોકાત ।
વિહિતમનુસરંતો ધર્મશાસ્ત્રપ્રવીણાઃ
સવિતરિ સવિતારં ચિંતચંતસ્ત્રિલોક્યાઃ ॥ ૧૪.૪૯ ॥

વિવિદુરતિતરાં ચે દેવતાઃ ષોઽશોકતા
હરહરિહચપૂર્વાત્યાઃ કલાભેદતોઽસ્ચ ।
સુહુતમતિસૃજંતોઽગ્ન્યાહિતાસ્તેઽગ્નિહોત્રં

www.yousigma.com

વ્યધુરુચિતમપૂર્વં યેન ગાયત્રલોકઃ ॥ ૧૪.૫૦ ॥

વિધુરયમકળંકઃ સ્યાદ યદિ સ્યાદવશ્યં
નનુ નિજસહજાયાઃ સુંદરાસ્યેંદુકલ્પઃ ।
ઈતિ સુરલલનાભિર્લાળિતઃ ખેચરીભિઃ
સમધિકમધુરિમ્ણા પૂર્ણચંદ્રસ્તદોદૈત ॥ ૧૪.૫૧ ॥

ઈનવિરહમસહ્યં પ્રાપ્ય પદ્મૈઃ સચક્રૈઃ
ચિરમિહ પરિતપ્તં પૂર્વતપ્તૈઃ સુતુષ્ટમ ।
મૃદુકુમુદચકોરૈઃ પાદસંગેન રાજ્ઞઃ
કમપિ સકલહૃદ્યં કલ્પયેન્નૈવ દૈવમ ॥ ૧૪.૫૨ ॥

દલિતેંદ્રનીલમણિનીલવિભ્રમં
નવકુંદકુડ્મળસિતદ્વિજાવલિ ।
સ્મિતયા નગોત્તમશિરસ્સુજાતયા
વનમાલયા સુરભિતાશયાઽન્વિતમ ॥ ૧૪.૫૩ ॥

મૃદુગામિવિમાનસંપદો
રમયત સુસ્મિતગોપસુંદરીઃ ।
પરિતાપવિહીનમુજ્જ્વલં
સુતતં સૂક્ષ્મતરાંબરં વરમ ॥ ૧૪.૫૪ ॥

ગોભિસ્તમાંસ્યપનયન ગતિદં પ્રજાનાં

અર્થાંતરં સ ભગવાન પ્રકટીચકાર ।
આનંદચિદ્ગુણગણં પરિપૂર્ણસંવિત
ચંદ્રસ્તુ શબ્દગુણમિત્યયમેવ ભેદઃ ॥ ૧૪.૫૫ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે ચતુર્દશઃ સર્ગઃ ॥

www.yousigma.com